योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०१५

श्रीवसिष्ठ उवाच ।

जगदाकाशमेवेदं यथा हि व्योम्नि मौक्तिकम् ।

विमले भाति स्वात्मैव जगच्चिद्गगनं यथा ।। १

अनुत्कीर्णैb भातीव त्रिजगच्छालभञ्जिका ।

चित्स्तम्भेनैव सोत्कीर्णा नचोत्कर्तात्र विद्यते ।। २

समुद्रेऽन्तर्जलस्पन्दाः स्वभावादच्युता अपि ।

वीचिवेगा भवन्तीव परे दृश्यविदस्तथा ।। ३

जालान्तर्गतसूर्याभा जालाकाररजांस्यपि ।

जगद्भानं प्रति स्थूलान्यणुं प्रति यथाचलाः ।। ४

जगद्भानं न भातीदं ब्रह्मणो व्यतिरेकतः ।

जालसूर्यांशुजालं तु व्यतिरेकानुभूतिदम् ।। ५५

अनुभूतान्यपीमानि जगन्ति व्योमरूपिणि ।

पृथ्व्यादीनि न सन्त्येव स्वप्नसंकल्पयोरिव ।। ६

पिण्डग्रहो जगत्यस्मिन्विज्ञानाकाशरूपिणि ।

मरुनद्यां जलमिव न संभवति कुत्रचित् ।। ७

जगत्यपिण्डग्राहेऽस्मिन्संकल्पनगरोपमे ।

मरौ सरिदिवाभाति दृश्यता भ्रान्तिरूपिणी ।। ८

स्वप्नाद्दृश्येव जगतां तुलादेशेन केन च।

तुलिता कलनोन्मुक्ता दृश्यश्रीर्व्योम जृम्भते ।। ९

वर्जयित्वा ज्ञविज्ञानं जगच्छब्दार्थभाजनम् ।

जगद्ब्रह्मस्वशब्दानामर्थे नास्त्येव भिन्नता ।। १०

इदं त्वचेत्यचिन्मात्रं भानोर्भातं नभः प्रति ।

तथा सूक्ष्मं यथा मेघं प्रति संकल्पवारिदः ।। ११

यथा स्वप्नपुरं स्वच्छं जाग्रत्पुरवरं प्रति ।

तथा जगदिदं स्वच्छं सांकल्पिकजगत्प्रति ।। १२

तस्मादचेत्यचिद्रूपं जगद्व्योमेव केवलम् ।

शून्यौ व्योमजगच्छब्दौ पर्यायौ विद्धि चिन्मयौ ।। १३

तस्मान्न किंचिदुत्पन्नं जगदादीह दृश्यकम् ।

अनाख्यमनभिव्यक्तं यथास्थितमवस्थितम् ।। १४

जगदेव महाकाशे चिदाकाशमभित्तिमत् ।

तद्देशस्याणुमात्रस्य तुलायाश्चाप्रपूरकम् ।। १५

आकाशरूपमेवाच्छं पिण्डग्रहविवर्जितम् ।

व्योम्नि व्योममयं चित्रं संकल्पपुरवत्स्थितम् ।। १६

अत्रेदं मण्डपाख्यानं शृणु श्रवणभूषणम् ।

निःसंदेहो यथैषोऽर्थश्चित्ते विश्रान्तिमेष्यति ।। १७

श्रीराम उवाच ।

सद्बोधवृद्धये ब्रह्मन्समासेन वदाशु मे ।

मण्डपाख्यानमखिलं येन बोधो विवर्धते ।। १८

श्रीवसिष्ठ उवाच ।

अभूदस्मिन्महीपीठे कुलपद्मो विकाशवान् ।

पद्मो नाम नृपः श्रीमान्बहुपुत्रो विवेकवान् ।। १९

मर्यादापालनाम्भोधिर्द्विषत्तिमिरभास्करः ।

कान्ताकुमुदिनीचन्द्रो दोषतृणहुताशनः ।। २०

मेरुर्विबुधवृन्दानां यशश्चन्द्रो भवार्णवे ।

सरः सद्गुणहंसानां कमलामलभास्करः ।। २१

संग्रामवीरुत्पवनो मनोमातङ्गकेसरी ।

समस्तविद्यादयितः सर्वाश्चर्यगुणाकरः ।। २२

सुरारिसागरक्षोभविलसन्मन्दराचलः ।

विलासपुष्पौघमधुः सौभाग्यकुसुमायुधः ।। २३

लीलालतालास्यमरुत्साहसोत्साहकेशवः ।

सौजन्यकैरवशशी दुर्लीलावल्लिकानलः ।। २७

तस्यास्ति सुभगा भार्या लीला नाम विलासिनी ।

सर्वसौभाग्यवलिता कमलेवोदिताऽवनौ ।। २५

सर्वानुवृत्तिललिता लीला मधुरभाषिणी ।

सानन्दमन्दचलिता द्वितीयेन्दूदयस्मिता ।। २६

अलकालिमनोहारिवदनाम्भोजशालिनी ।

सिताङ्गी कर्णिकागौरी जङ्गमेव सरोजिनी ।। २७

लताविलासकुन्दौघभासिनी रसशालिनी ।

प्रवालहस्ता पुष्पाभा मधुश्रीरिव देहिनी ।। २८

अवदाततनुः पुण्या स्पर्शनाह्लादकारिणी

गङ्गेव गां गता देहवती हंसविलासिनी ।। २९

तस्य भूतलपुष्पेषोः सकलाह्लाददायिनः ।

परिचर्यां चिरं कर्तुमन्या रतिरिवोदिता ।। ३०

उद्विग्ने प्रोद्विग्ना मुदिते मुदिता समाकुलाकुलिते ।

प्रतिबिम्बसमा कान्ता संक्रुद्धे केवलं भीता ।। ३१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे मण्डपोपाख्याने राजवर्णनं नाम पञ्चदशः सर्गः ।। १५ ।।